5946

16+6+15+13+77+168+28+9

५०६

104 श्लोक 105

106 A 107

५०६

प्र.
१

ॐश्रीगणेशायनमः अथप्रयोगांतराणिका
त्यायनीतंत्रोक्तानि प्रतिश्लोकमाद्यंतयोः ॐ
मंत्रजपेत्सिद्धिः १ प्रथमचैत्रश्लोकपदंमंत्रोप
लक्षणं सप्तशतीमंत्रलोमव्याहृतित्रयमादौ
अंतेतविलोमं नदिमेवंप्रतिश्लोकंकृत्वा श
तावृत्तपाठैरतिशीघ्रसिद्धिः २ प्रतिश्लोकमादौ

ॐ जातवेदसे सुनवाम सोममरातीयतो निद
हाति वेदः स नः स्पर्षदति दुर्गाणि विश्वा नावे
व सिंधुं दुरितात्यग्निः इत्यृचं पठेत्सर्वकामसिद्धिः ३
अपमृत्युवारणाय त्र्यंबकं यजामहे सुगंधिं पु
ष्टिवर्द्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मा
मृतात् आदावंते च शतमित्यर्थः प्रतिश्लोकं त

प्र· मंत्रजपस्यमंत्र ४ प्रतिश्लोके शूलेनपाहिनोदे
२ विपाहिखड्गेनचांबिकेघंटास्वनेननःपाहिचाप
ज्यानिःस्वनेनच पाठादपमृत्युनाशः अस्यकेवल
स्यापिश्लोकस्य लक्षमयुतंसहस्रंशतंवाजपे अ
पमृत्युवारणं ५ प्रतिश्लोके शरणागतदीनार्त
परित्राणपरायणे सर्वस्यार्तिहरेदेवि ॥

नारायणिनमोस्तुते श्लोकंपठेत्सर्वकार्यसिद्धिः ९
प्रतिश्लोकं करोतुसानःशुभहेतु रीश्वरीशुभा
निभद्राण्यभिहन्तुचापदः इत्यर्द्धंपठेत्सर्वका
र्यसिद्धिः ७ स्वाभीष्टवरप्राप्तयेएवंदेव्यावरोल
ब्धात्सुरथःक्षत्रियर्षभः सूर्याज्जन्मसमासाद्य
सावर्णिर्भवितामनुः ८ सर्वापन्निवारणायप्र

प्रे॰
३

त्रिलोकं दुर्गेस्मृताहरसिभीतिमशेषजंतोःस्वस्थैः
स्मृतामतिमतीवशुभांददासि दारिद्र्यदुःखभय
हारिणिकात्वदन्या सर्वोपकारकरणायसदार्द्र
चित्ता ब्रह्मकेवलस्यापिश्लोकस्य कार्यांतुस्मरण
लक्षमयुतं सहस्रंशतंवाजपः ९ सर्वाबाधाप्रश
मनंत्रैलोक्यस्याखिलेश्वरि ॥ एवमेव

3

त्वयाकार्यमस्मद्वैरिविनाशनं लक्षजपे ग्रन्तिश्लो
कपाठेवाश्लोकोक्तंफल १ इत्थंयदायदाबाधादा
नवोत्थाभविष्यति तदातदावतीर्याहंकरिष्या
म्यरिसंक्षयम् श्लोकजपेमहामारीशान्तिः ११ त
तोवव्रेनृपोराज्यमविभ्रंश्यन्यजन्मनि अत्रैवच
निजंराज्यंहतशत्रुबलंबलात् जपेपुनःस्वराज्य

प्र॰
५

लाभः १२ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जग
त् साघंटा पातु नो देवि पापेभ्योनः सुतानिव
बालग्रहशांतिः १३ प्रथमावृत्तिमनुलोमेन ततो
विपरीतक्रमेण द्वितीयामनुलोमेन तृतीया
मित्येव मावृत्तित्रयेण शीघ्रकार्यसिद्धिः १४
सर्वापन्निवारणाय दुर्गेस्मृता हरसि भीति ।

मशोघजंनेनाःस्वस्यैःस्वतामनिमनीवश्रमोददा
सि १५ यदेतियज्ञहरकेभयंविदंतिमामिह पा
वमानवितजाहि इत्थंचेतदंतेदारिद्र्यदुःखेस्यहि
मेवेकायानुसारेण लक्ष्मयुतेमहस्वेषानेवा
जपः १५ कांसोस्मितांहिरण्यप्राकारामार्द्रांज्व
लंतींतृप्तांतर्पयंतीम् पद्मेस्थितांपद्मवर्णांता

प्र. मिहोपद्रवेभ्यश्चयम् अत्रवंप्रतिश्लोकेपठेतलक्ष्मी
५ शान्तिः १९ ब्रह्मणाश्चस्मिन्ब्रह्मणाःपरस्मिन् स्तनी
5 येलोकेब्रह्मणाश्चास्याम येदेवयानापितृया
णाश्चलोकाः सर्वान्यथोश्चान्तणाश्चाह्लिपेमः
श्मास्त्वंपरेहणपरिहारः १७ मारणार्थ
म् एवमुक्त्वासमुत्पन्नमातृष्ठानेमहास

रे पादेनाक्रम्यकंठेच स्मूलेनैनमनाउयत्
श्लोकेप्रतिश्लोकंपठे न्मारणोक्ताहृत्तिसिः फ
लसिद्धिः १८ ज्ञानिनामपिचेतांसिदेवीभगव
तीहिसा बलादाकृष्यमोहायमहामायाप्रयच्छति
इतिश्लोकजपमात्रेण सर्वेमोहनसिद्धिर्भवति
प्रतिश्लोकंतन्नश्लोकपाठेनवश्यम १९ रोगान

प्र.
८

शेषानपहंसितुष्टा रुष्टातुकामान्सकलानभी
ष्टान् त्वामाश्रितानांनविपन्नराणांत्वामाश्रिता
ह्याश्रयतांप्रयांति इतिश्लोकस्यप्रतिश्लोकेपाठे
सकलरोगनाशः तन्मात्रजपेपिसः २ इत्युक्ता
सातदादेवीगंभीरांतःस्मिताजगौ दुर्गाभगवती
भद्राययेदंधार्यतेजगत् इतिश्लोकस्यप्रतिश्लोके

पाठे एणकजपेवा वियाप्राप्ति वीर्यैवकृतनाश्च
२१ भगवत्याकृतंसर्वंनकिंचिदवशिष्यते यद
येनिहतःशत्रुरस्माकंमहिषासुरः इत्यादिद्वा
दशोनरश्चान्तात्लोमेत्रः सर्वकामदःसर्वापन्निवा
रणाश्च २२ देविप्रपन्नार्तिहरेप्रसीदप्रसीदमातर्ज
गतोखिलस्य प्रसीदविश्वेश्वरिपाहिविश्वंत्व

प्र· ८ मीश्वरीदेविचराचरस्य इतिश्लोकस्य यथाकार्यं
लक्षापुतसहस्रशतान्यतमसंख्यजपे प्रतिश्लो
के पाठे वा सर्वोपद्रवनिवृत्तिः सर्वकामाप्तिश्च पञ्च
योगेषु प्रतिश्लोके दीपाग्रे केवलमेव नमस्कार
रेःतिशीघ्रंसिद्धिः प्रतिश्लोके क्लींबीजसंपुटि
तस्य एकचत्वारिंशद्दिनं त्रिरावृत्तौ सर्वकामसि

द्धिः २३ एकविंशतिदिनपर्यंतमुक्तरीत्या प्रत्य
हं द्वादशाहुत्यौ वशीकरणम् २४ ह्रींबीजसंपु
टितस्य फट्पल्लवसहितस्य सप्तदिनपर्यंतेत्र
योदशाहुत्यावुच्चाटनसिद्धिः २५ नाहमेषामेवद्वि
नेवसहस्य मेकादशाहुत्यौ सर्वोपद्रवनाशः २६
एकोनपंचाशद्दिनपर्यंते प्रतिश्लोके श्री ।

पु॰ बीजसंपुटितस्य पंचदशावृत्त्यालक्ष्मीप्राप्तिः २७
५ प्रतिश्लोकं पंबीजसंपुटितस्य शतावृत्त्या विद्या
४ प्राप्तिः २८ अथशांतवेडीविधिः शंकरस्यभवा
न्यावाप्रासादनिकटेशुभे मंडपेद्वारवेद्याद्यलंकृ
र्यांतध्वजतोरणे १ तत्रकुंडंप्रकुर्वीतप्रतीच्यांस
ध्यनोपिवा तावानित्यक्रियांकृत्वाब्राह्मणेयाहूप्रा

वाडवान् २ जितेंद्रियान्सदाचारान् कुलीनान्सत्य
वादिनः वाडवाब्राह्मणाःश्रुतमंत्रांश्चंडिकापाठ
रतान्लज्जादयावतः ३ मधुपर्कविधानेनवस्त्रा
वस्त्रादिदानतः जपार्थमासनेमालोदद्यात्तेभ्योऽपि
भोजनं ४ नेहविष्यान्नमश्नंतो मंत्रार्थगतमानसाः
भूमौशयानाःप्रत्येकं जपेयुश्चंडिकास्त ॥

सं.
९
9

वे ५ मार्कंडेयपुराणोक्ते दशाकृत्वः सचेतसः
नवार्णं चंडिकामंत्रं जपेच्छुद्धात्मने पृथक् ८ पृ
थक् संपुटीकरणादिति शेषः प्रत्येकं ब्राह्मणैरयु
तजपः कार्यः अष्टमीनवमीचतुर्दशीपौर्णमासी
षु यथाशक्त्याहुतिसमाप्तिर्भवति तथारंभः कर्तव्य
इति सांप्रदायिकाः यजमानः पूजयेच्च कन्यानो

नवकेशुभम् द्विवर्षीयादशाब्दांताः कुमारीः प
रिपूजयेत् १ नामांक्रमेणनामानि कुमारी १
त्रिमूर्तिः २ कल्याणी ३ रोहिणी ४ कालिका ५
शांभवी ६ दुर्गा ७ चंडिका ८ सुभद्रा ९ इतिनाम
मंत्रैस्तासांपूजा नवहीनाधिकांगीकुष्ठव्रणयुता
श्चेधाकाणाकुरूपाकेकराकुबरी लोमयुग्देहादा

प्र॰
१०
10

सिजारोगिणी त्येवमाद्यावर्ज्जाः विप्रोसर्वेष्वसे
सिद्धै यशमेत्तत्रियोऽइवाम वैश्यजौधनलाभा
य प्रज्ञास्ये शूद्रजौयजेत् गंध पुष्प धूपदीपम
लभोज्ये यथाशक्तिवस्त्राभरणैश्चपूजयेत् हि
वर्षामाकुमारिकेका त्रिमूर्त्तिर्हायनत्रिका चतुर
हाचकल्याणी पंचवर्षातुरोहिणी षडूहाका

लिका प्रोक्ता चंडिका सप्तहायना अष्टवर्षा शांभ
वी स्यात् दुर्गा च नवहायना सुभद्रा दशवर्षाक्ता
नामभिः मंत्रैः प्रपूजयेत् तासामावाहने मंत्रः प्रोच्य
ते श्री करोति तः मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधा
रिणीं नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं
कुमारिकादिकन्यानां पूजामंत्रान्त्रवेऽधुना जगात्

प्र॰ ११ येजगद्देवे सर्वशक्तिस्वरूपिणि छजो गद्दाणको
मारि जगन्मातर्नमोस्तुते त्रिगुणात्रिगुणाधारे त्रि
वर्णीज्ञानरूपिणीम त्रैलोक्यवंदितादेवी त्रि
मूर्तिंपूजयाम्यहं कलात्मिकांकलातीतांकारु
णपल्टयांशिवां कल्याणजननीदेवीकल्याणी
पूजयाम्यहं श्रणिमादिगुणाधारा ॥

मकारायतत्वात्मिकां अनंतशक्तिकौलक्ष्मीं रोहि
णीं पूजयाम्यहं कामचारीं शुभां कांतां कालचक्र
स्वरूपिणीं कामदां करुणोदारां कालिकां पूज
याम्यहं चंडवीरां चंडमायां चंडमुंडप्रभंजनीं पू
जयामि सदा देवीं चंडिकां चंडविक्रमां सदानंद
करीं शांतां सर्वदेवनमस्कृतां सर्वभूतात्मिकां

१. लक्ष्मी शोभवींपूजयाम्यहं दुर्गमेदुस्तरेका
१२ र्यैभवदुःखविनाशिनी पूजयामिसदाभक्त्या
12 दुर्गांदुर्गार्तिनाशिनी सुदंशीस्वर्णवर्णाभांसु
खसौभाग्यदायिनी सुभद्रजननींदेवींसुभद्रां
पूजयाम्यहं पतैर्मंत्रैःपुराणोक्तैः संतोकन्यांसु
मर्चयेत् इतिपूजनेकुमारिकाणां ॥ वेद्यां

विरचिते रम्ये सर्वतोभद्रमंडले घटं मे स्थाप्य विधि
नातत्रावाह्यार्चयेच्छिवां तदग्रे कन्यका स्थापि पू
जयेद्ब्राह्मणानपि उपचारैस्तु विविधैर्नवार्णीव
रणानपि ॐकारं प्रथमं पीठं पूर्णपीठमतः परं
तृतीयं कामपीठं च पूजयेत्संप्रदायतः पूर्वादि
दिक्षु पीठस्य गणेशादिचतुष्टयं गणेशाक्षेत्र

श्रै°
१३
13

पालौच पाड्केवड्काष्ठय: प्राग्नेय्यादिचतुर्दि
क्षुज्ञंदेवीचतुष्टय जयाचविजयाचैवजयंती
चापराजिता पूर्वोक्तयंत्रेपूर्वकोणे सरस्वती
सहितोब्रह्मा श्रीसहितोविष्णु नैर्ऋत्यामुम
याशिवोवायव्यां षट्कोणचक्रमध्यस्य
मध्यवीजे श्रीमहालक्ष्मी: ह्रीमहाका।

ली ऐंमहासरस्वती दक्षिणवामयोः उदकसिं
ही दक्षिणेमहिषः षट्कोणेषुनंदजारक्तदंति
का शाकंभरीदुर्गा भीमाभ्रामर्यः सर्विंडनामाय
वर्णिताद्याश्वासांनाममंत्राः पूजादौ तारः षण
वः अष्टपत्रेषु ब्रह्माणीमाहेश्वरीकौमारीवैष्णवी
वाराहीनारसिंहीऐंद्रीचामुंडा उक्तरीत्यानाममं

पु. त्रैः पूज्याः ततो विष्णुमायादि चतुर्विंशति देव
१४ ताः शागादि क्रमेण केसरेषु पूज्याः प्रतिपत्रे च
केसरत्रयं तास्तु विष्णुमाया १ चेतना २ बुद्धिः ३ उ
निद्रा ४ क्षुधा ५ छाया ६ शक्तिः ७ तृष्णा ८ क्षांति :
९ जातिः १० लज्जा ११ शांतिः १२ श्रद्धा १३ कांतिः १४
लक्ष्मीः १५ धृतिः १६ वृत्तिः १७ स्मृतिः १८ दया १९

तुष्टिः २० पुष्टिः २१ मातृ २२ भ्रान्तिः २३ चिति २४ रू
पापन्नावस्थः समप्तानीस्तवे पंचमेध्याये श्लोसं
ख्याविंशतीनीनपाठइति नभ्रमितव्यं कामाय
नीतेत्रविशेषात् नालमूलेनसंपूज्यमाधाराद्दिव
नैद्यम श्राधारःकूर्मशेषौच वज्रबीहापृथिवीन्द
प ग्रहकोणेभुगणेशः क्षेत्रपालोबटुकोयो ·

प्र॰ गिर्भः प्रागादिदिक्षु रिं द्रायाश्चेति पंचवक्त्रदिंनं
१५ ऊर्यात् तत्र प्रथमे क्रिप्काह्ति द्वितीयेहे रती
15 येतिष श्रुतर्षैचतस्त्रउत्ति पंचमे होमः होमद्र
व्याणि पायसान्नै हविमधक्तै द्राक्षारंभाफलादि
भिः मातलुंगैर्हरिद्रैर्नारिकेरगुनैस्तिलैः जाती
फलैराम्रफलै रंभैर्मधुरवस्तुभिरिति समप्रा

स्यादशाहस्याप्रतिमेवंहुतंचरेत् प्रयुतेचनवा
णेंनस्थापितेग्रोविधानतः कृत्वावरणदेवानां
होमेतत्रासमेवतः कृत्वापूर्णाहुतिंसम्परदेव
मग्निंविसृज्यच अभिषिंचेद्युयष्टारं विशेषतः क
लशोदकैः निष्कंसुवर्णमथवा प्रत्येकंदक्षि
णांदिशेत् भोजयेच्चशतंविप्रान् ॥

९. मत्समोज्यैः षण्णविधैः तेभ्योपि दक्षिणां दत्वा
१९ ग्रह्णीयादाशिषस्तण्णा एवंकृते जगद्वश्यं
सर्वे नश्यंत्युपद्रवाः इति शान्तवेडीविधिः ॥

ॐनमःचंडिकाये ॐश्रीमन्महामहाराज्य चरणांभोरु
हद्वयी चराचरजगद्धात्रींचंडिकांप्रणमाम्यहम् १ ॐ
शिरोरक्षतुब्रह्माणीमुखंमाहेश्वरीतथाकौमारीहृद
यंरक्षेदुदरंवैस्नवीपरावाराहीचकटिंशस्यमैंद्रीचोरू
सदा मम चामुंडाजानुदेशंच पादौरक्षतुचंडिका क
कालिका भुजौ प्रह्लंदक्षपाद भुजानना श्रेग प्रत्यंगसं

पू॰ जा॰ १

धीम्ब्रमदारदंतमानरः ओंजातशिखायां वेदसे ललाटे
सुनवामकर्णयोः सोमंनासिकायां अरातिचक्षुयोः यत
ओंष्ठयोः निर्दनेषु दहातिनाल्पति वेदःजिह्वायां सग्रीवा
यो नःबाह्वोः पर्षहृदि अतिस्तनयोः दुःकुक्षौ गाणिनाभौ
विश्वापृष्ठे नावापाण्योः इववृषणयोः सिंधुशिश्ने दुःक
रितां अतऊर्वोः अतिजंघयोः अग्निःपादयोः ओंजातवेदसे

सुनवाम अंगुष्ठाभ्यांनमः हृदयायनमः सोममराति
यतो तर्जनीभ्यांनमः शिरसेस्वाहा निदहातिवेदःमध्य
माभ्यांनमः शिखायैवषट् सनःपर्षदति अनामिका
भ्यांनमः कवचायहुम् दुर्गाणिविश्वानावेवकनिष्ठका
भ्यांनमः नेत्रत्रयायवौषट् सिंधुंदुरितात्यग्निः करत
लकरपृष्ठाभ्यांनमः अस्त्रायफट् ओंह्रांश्रं· हृद· ओंपं

पू॰ जा॰ २ ह्रीं श्रीं गं ग्लौं गणपतये नमः ओं ऐं ह्रीं श्रीं क्लीं ह्रीं क्षेत्रपाला
यनमः ॐ तीक्ष्णशृंगाय महिषाय नमः ॐ वनस्पतिपुत्रा
य सिंहाय नमः ॐ समस्तगुरुपादुकाभ्यो नमः इति द्वा
रपालः ॐ गुरवे नमः परमगुरवे नमः परमाचार्याय
नमः परमेष्ठिने नमः आदिसिद्धेभ्यो नमः इति गुरुपू
जा ॐ विष्णवे नमः ॐ वैष्णव्यै नमः ॐ रुद्राय नमः ॐ

रुद्राण्यैनमः षं ब्रह्मणेनमः षं ब्रह्माण्यैनमः इति
मिथुनत्रयं देवीपूर्वतः ॐ ऐं ह्रीं श्रीं कौमार्यैनमः षं ऐं
द्र्यैनमः षं वाराह्यैनमः इत्युत्तरे षं चंडिकायैनमः षं
चामुंडायैनमः षं महालक्ष्म्यैनमः इतिपश्चिमे इति
देवतात्रयं पूरतः षं चामुंडेनमः षं चंडमूर्तयेनमः
षं सः नमोभगवतिमहादुर्गे चंडिकात्यायनिनमः

इतिमूलं ॐनमःपिशिताशनि किलिकिलि विस्फुरज्व
ह्लेसिंहारूढेपहेहिआगच्छआगच्छ वलिपूजांगृह्ण
गृह्ण सिद्धिंकुरुकुरु ॐ चंडिकायैनमः इत्यावाहनं ॐ विं
ध्यवासिन्यैनमः ॐ रक्तदंतिकायैनमः ॐ शताक्ष्यैनमः ॐ
शाकंभर्यैनमः ॐ ऐंह्रींश्रींभीमायैनमः ॐ भ्रामर्यैन
मः इत्यावरणं ॐ चामुंडेपाद्यंगृह्णाणनमः अर्घ्यंगृह्ण

णनमः धूपंगृह्णाणनमः दीपंगृह्णाणनमः पुष्पंगृ
ह्णाणनमः षं चामुंडेगणपतिक्षेत्रपालसहितेवलिंगृ
ह्णाणनमः ॐनमःमुसलपाणये क्षेत्रपालायनमः
इतिपूजाविधाने ॐपटलंदेवतागात्रेपद्धतिर्देवताशि
रः कवचंदेवतावस्त्रं सहस्राख्यंमुखंस्मृतं स्तोत्रंदेवर
साःप्रोक्तं पंचांगमिदमुत्तमेएकांगेनविहीनस्य जपं

मंत्रेवनिष्फलं अनेनविधिनायस्तुपूजयित्वाचवाचयेत्
तस्मैदेव्यःप्रयच्छंतिवितरंतिमहद्धनं अनेनविधिनाय
स्तुविहीनंपुस्तकंपठेत् तस्यजाप्यंभवेद्व्यर्थं मरणंप्रकु
दितंयथा ददाति विपुलां सिद्धिं ददाति विपुलं धनं यो
जपेत्तस्यवृद्धिःस्यात्तेमंप्राप्नोतिनित्यशः पुस्तकंसाम्प्रश
तिकमनेनविधिनार्चयेत् सर्वान्कामानवाप्नोतिरुद्रस्य

वचनेयथा ततःसंकल्पः ॐअद्याहंसर्ववाधा प्रशम
नदुष्टतानुपपत्ति दुःखोत्पादनत्व दारिद्र्यानुप
पत्ति इष्टवियोगराजाहित शत्रुदस्युराजशस्त्रानलतो
यौच्चसर्पवृश्चिकजन्यताभावमहामारीमसुरवाधो
घोपसर्गोत्पत्तिप्रशमन सर्वपापक्षयपनयात्पहता
दिप्राप्तिसकलरिपुक्षय कल्याणोत्पत्तिकुलानंद

दु: दारुणग्रहपीडाप्रशांति दुःस्वप्ननाशकामः स्वल्पेनोपप
जा: त्ति सर्वसंकटविमुक्तिशुभामतिः श्रीदुर्गाप्रीतिकामो
५ मार्कंडेयपुराणांतर्गत सावर्णिः सूर्यतनय इत्यारभ्य
5 सावर्णिर्भविता मनुरित्यंतेन देवीमाहात्म्येन दुर्गादेवी
स्तोत्रे नवार्णवमंत्रसंपुटितेन कवचकीलकार्गला
रहस्यसहितेन ब्राह्मणद्वारा दयादियथाकालेप्रात

कृत्वेन सहस्रकृत्वेनवादेवीस्तौष्ये यामिंडष्येनतथारां
विगलितमनसांतोपिवामोनमध्यं पंचानामिंद्रिया
णांविरतर् सनयाचर्बयामोनमांसं श्रालिंग्यामोन
कांतांप्रसऊटिलतनौ नाडिकांतांसहस्रमांगां स्तन्योचि
नेविलीनेपरशिवमिथुने मैथुनंतत्रयोनौ

6

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

ल. १

ॐश्रीत्रिपुरसुंदर्य्यैनमः॥ॐऐंह्स्रै
वशागमनस्पदयनीमध्येललाटत्र
भाशैह्लींकांतिमन्तुल्मगोरिवशिर
स्पानल्वतीसर्वतः॥पद्मासोत्रिपुरा
हृदिफतिरिवोल्लसंघोः सदाहः स्थिता

ह्रिंयात्रःसहस्रापदेस्त्रिभिरवेभो
तिर्मयीवाङ्मयो १ यामाज्ञात्रभुसी
लनातन्नुलसतेतृष्यितिस्पर्द्दिनी
वागवीजेप्रथमेस्थितानवसदाता
मन्म्हेनेवघनश्शाक्लिंःॐडलिनी

ले २ तिं विश्वजननव्यापारबद्धोद्यमो ज्ञा
नेच्छंन पुनः स्पृशंति जननीगर्भार्भक
त्वं नगाः २ दृष्ट्वा संभ्रमकारिवल्लभ
हस्तापैंपैं इति व्याहृतं येनाकृतव
शादपीह वरदेविंडैं विनाप्यक्षर ।

तस्यापिह्येवमेवदेविनरस्याज्जाते
तवानुग्रहे वाचःसूक्तिसुधारसद्
वमुचोनिर्यातिवक्त्रांबुजात १ य
त्रिमितवकामराजमपरंमंत्रान्तरे
निष्कले तत्मारखनमिम्वैत्रिवि

लै. ३ रलः कश्चिद्दुपश्चद्दुवि श्राख्यातेत्र।
तिपर्वसम्मतपसोयक्रीतेयेनोद्धि।
जाः श्रीरंभेत्रणवास्पदत्रणायनो
नीनावहरंतिस्फुटं ४ यत्मयोववसे
प्रहतिकरणेदृष्टप्रभावेद्युये ।

3

स्नानीयंतदहंनमामिमनसावह्नी
जमिंदुप्रभे श्लेषोर्वीपिसरस्वतीम
नुगतोजाद्याभुविछिनये गेः शाह्वि
मिरिवर्तितेहतियतेयोगेविनासि
द्दिटः ५ पकेकेनवदेविबीजमते

ले· ४

वेसंबंजनाबंजनेकूटस्यंयदिवा
पृथक्क्रमगतेयद्वाप्यितेश्रुत्कमा
त येयेकाममपेस्येयेनविविधि·
नायेनापिवावि तिनंजमेवासफ
लीकरोतितिनरसानेनेसमसंलटाणा ९

वामेक्षलकयातिणीमभयदोसात
त्वजेंदतिलि भक्तेभ्योवरदानपेश
लकरोकर्पूरक्रेदोज्वलो उद्भेभोत्तु
जपत्रकोंतिनयनस्त्रिगपद्मालोकि
नी येवांमवनश्रीलयंतिमनसाते

ले
५
5

णंकविनंजनः ७ येनोपोडुरपुंडरी
कपटलसच्छाभिरामश्रभो सिंवेती
मस्तनद्वैरिवशिरोध्यायेतिःसूर्यं
स्थितो प्रशांतेविकटस्फुटाहारप
दानियेतिवक्रोत्रुजा ॥ ॥

नेषांभारतिभारतीसुरसरित्कहो
ललोलोसिवत्र ८ येसिंहरपरा
गपुंजपिहितांत्वतेजसाघामिमा
मुवींचापिविलीनयावकरसाप्रला
रमयामिव पशुपतिलएममध्यनम

ले:
९
6

मनसल्लेषामनेगज्वरः क्रोनास्व
ल्कुरंगशावकदृशोवशणाभवेति
स्त्रियः ९ वेचकोचनक्रेंङलोगाद्य
गमावडकोचीस्वज्ञेघेबांचेतसित
ङनेतणमपिध्यायेतिकृताखिरं

तेषांवेश्मनिविभ्रमादहरहःस्फा
रीभर्वत्स्वश्रिरं श्रियत्तुंगजरकणि
तालतरलाःस्थैर्यंभजंतेश्रियः १
श्रर्भ्यापाशार्श्विविउमेडितजटाजूटो
न्मुंडस्नजे वेभूकपमसवाफणावा

ल· यंत्रेतासनाध्यासिनीं त्वांध्याये
२ तिचतुर्भुजांत्रिनयनामापीनतुंग
स्तनींमध्येनिम्नवलित्रयांकिततनुं
त्वद्रूपंसंचिंतये ५ जातोप्यल्पपरि
च्छदेक्षितिभुजांसामान्यमात्रेकुले

निःशेषावनिचक्रवर्त्तिपदवीलब्धा
श्चतापोन्नतः पश्चिमपश्चिमेदवेदि
तपदः श्रीवत्सराजोभवेत् देविव
हरणोभुजप्रणतिजःश्रेयःप्रसादे
दयः ९ वेदिविहरणोभुजार्पनकृ

ले. नेविलीदलोलंठनात् ग्रुड्राक्रंटक
८ कीटिभिःपरिवेयेष्टांनजग्नुःकराः
नेदंडेक्षशाचक्रचापक्षलिशाश्रीव
त्समंतस्याकितेजांयंतेपृथिवीभुजा
कथमिवांभोजद्रभेःपाणिभिः ९

विशःतोत्रिभुज्ञोविशाल्लदितैरेती
राज्यमधामवैल्पांदेवित्रिपुरेपरा
परकलासंतर्प्यपूजाविधौयंयं
ज्ञार्थ्ययतेमनःस्थिरधियोयातेषांतप
वफवंतांतांसिद्धिमवाप्नुवंतित

रमाविघ्नैरविघ्नीकृताः ४ शाह्यांतो
जननीनमत्रभुवनेवाग्वादिनीम
चमेवनःकेशववासवब्रह्मनयो
याविर्भवंतिफवे लीयंतेविलय
त्रकल्पविरमेत्रलादयस्तेप्पमी

मात्वंकाविदचिंत्यरूपमहिमाशक्तिः
परागीयसे १५ देवानांत्रितयंत्रयी
हुतभुजांशक्तित्रयंत्रिस्वरास्त्रैलोक्यं
त्रिपदीत्रिपुष्करमथोत्रिब्रह्मवर्णा
स्त्रयः यत्किंचिज्जगतित्रिधानियमि

लें: १ 10

नेवलत्रिवर्गादिकं नत्सर्वंत्रिशुरे
स्तनामभगवत्सेतिनेवबवतः ९
लक्ष्मीराजकुलेजयारणसुविदेमे
करीमधनि क्रव्यादहिपसर्प्पभा
नशर्वरीकांतारडुगैगिरौ ॥

भूतप्रेतपिशाचजंभकभयेसस्त्वा
महाभैरवौ व्यामोहेविश्रांतरेति
वियद्दलागेवतेोयज्ञवे ९ मायाकु
उलिनोक्रियामधुमतीकालीकला
मालिनी मातंगीविजयाजयाभगव

ल॰ नीदेवीशिवाशांभवी शक्तिःशंकर
११ वल्लभात्रिनयनावाग्वाहिनीभैरवी
ह्रींकारीत्रिपुरापरापरमयीमाताकु
मारीत्यसि १८ आर्द्रपल्लवितैःपर
स्परयुतैर्द्विचिक्रमाद्यक्षरैः ॥

कायैःतांतगतैःस्वरादिभिरप्यंतांतो
श्रुतैस्सर्वैः नामानित्रिपुरेभवंति
त्विलुयान्यसंतगुह्यानिते तेभ्योभव
वपत्निविंशजिसहस्रेभ्योपरेभ्योन
मः ९ वोधव्यानिश्रुणंतुपेस्तति

ल॰ रियंकृत्वामनस्तत्कृते भारस्याधि
१२ ष्ठेत्मनन्यमनसोयज्ञाद्यहृन्तेस्क
टे एकद्वित्रिपदक्रमेणकथितः॰
स्वल्पदसंख्यातैर्मंत्रोद्धारविधिः॰
विशेषसहितःतंत्रेषुदायान्वितः ॥

सावद्यंनिरवद्यमल्पगदिवाकिंवा
नयाविनया नूनंस्तोउमिदेपठिष्य
तिजनोयस्यास्तिभक्तिस्त्विपि सेवि
सापिलघुतमात्मनिहठसंजायमा
नेह ठावड्डत्यास्त्रविरीक्रुतेनरवि

तेयस्मान्मयापिफ्रवं २१ ग्राने दोङ्
वकेपह्र्णिनयनेनिंद्राह्र्हासादि
के वेदव्याकरणावगाहनकरेसो
भागपसिद्धाह्वंकवश्पाकषिडरव्र॰
वेशाकविनानकौक्तिमुक्तिवदे ॰

ल॰
१३

13

लद्दीजाय्यमिदंकरोतिमततंयोगी
ग्धरेशोक्रवत् २२ गोरिश्रेवकप
त्तिपार्वतिमतित्रैलोकमानःशिवेः
शवाणिविपुरेभवानिवर्देफड्डाणि
कामायिनि भीमेभैरविचंडिसर्वेस

ले· १४

कलेकालेतणिभूलिनिवनपादश्र
णजानननमनमः पर्याकुलाख्या
णिनः २३ आईमवल्लरजनीचर
विंडुनादमेकात्तरंपदमिदंक्रम
कावदेति मंत्रेहियेनत्रयमंकितव

१५

सृष्टिस्थितिप्रलयहेतुमचिंत्यरूपं २४
यद्दिजपतिजडात्मौवैपुरेमेवराजे
भवतिभुविकवींद्रः सर्ववादींद्रजे
नाइदमपिकविमात्रेमनमातेंडगोड
च्यवतिमदजलौघः पिछलद्वारदेशे

लं॰
१५
15

इति लघ्वाचार्य्य विरचितं स्वप्नफल
वसमाप्तः शुभम्

क ॐनमःचंडिकाभगवत्यैः ॐह्रश्रोसं
१ स्थापनायत्वपहृरणावियौमोहृनेना
ग्रहेपि सर्वैषामगीलानांनिजमाहि
मवषादक्रमेनैवयालम् नित्यं
कीडाभ्रमत्कारचयानिसकलंखा

त्मषांक्त्याप्रपंचं सानस्त्राणाय
भूयादभिमतफलदाभद्रकाली
चकाली ॐ अस्यश्रीदेवीकवचस्तो
त्रमंत्रस्य श्रीब्रह्माऋषिः अनुष्टु
प्छंदः मार्कण्डेयऋषिर्वाश्रीच

क॰ डीपरमेश्वरीदेवता ह्रींवीजं श्रींश
२ क्तिः क्लींकीलकं श्रीमहामायाप्रीत्य
र्थं धर्मार्थकाममोक्षार्थं श्रीदेवी
ॐ अतिदीर्घ न्यासः
कवचपाठेविनियोगः श्रीमत्स
दाहताराख्यचरणांभोरुहहृदयी

म् चराचरंजगद्धात्रीचंडिकाप्रण
माम्यहम् ॐ श्रीशतानीकउवाच ॐय
ह्यंपरमंलोकेसर्वरक्षाकरंनृणा
म् यन्नकस्यचिदाख्यातंतन्मेब्रूहि
पितामह १ श्रीब्रह्मोवाच स्व

क स्तिगुह्यतमंविप्रसर्वंभूतोपकार
३ कम् देव्यास्तुकवचंपुण्यंतच्छृणु
3 ष्वमहामुने २ प्रथमंशैलपुत्रीतिद्वि
तीयंब्रह्मचारिणी तृतीयंचंडघं
टेतिकूष्मांडेतिचतुर्थकं ३ पंच

मेस्कंदमात्रेति षष्ठं कात्यायनीति च
सप्तमं कालरात्रीति महागौरीति
चाष्टमम् ४ नवमं सिद्धिदात्रीति
नवदुर्गाः प्रकीर्तिताः उक्तान्येतानि
नामानि ब्रह्मणैव महात्मना ५

क
४

अग्निनादह्यमानस्तुशत्रुमध्यगतो
रणे विषमेदुर्गमेचैवभयार्त्तोश
रणंगतः ९ नतेषांजायतेकिंचि
दशुभंरणसंकटे यस्तुभक्त्यास्तु
तान्नतेषांवृद्धिःप्रजायते ७

नापदस्तेषुपश्यंतिशोकदुःखभ
यंकरी येत्वांस्मरंतिदेवेशिनान्
रक्षांसिनसंशयः ८ प्रेतसंस्थातु
चामुंडावाराहीमहिषासना पैं
द्रीगजसमारूढावैष्णवीगरुडा

क ५ मना ए माहेश्वरी वृषारूढा कौमा
रीशिखिवाहना ब्राह्मी हंसमसमा
रूढा सर्वाभरणभूषिता ए श्वेत
रूपधरा देवीईश्वरी हयवाहना
स्तेनामानरा सर्वा सर्वरत्न समन्वि

नः ॥ नानाभरणशोभाढ्यानाना
रत्नोपशोभिताः ॥ दृष्ट्वैतेरथमारू
ढ्यादेव्याकोपसमन्विताः ॥ १२ शंखं
वज्रंगदांशक्तिंहलंचमुसलायु
धं ॥ खेटकंतोमरंचैवपरशुंपा

क शमेवच १३ कुंतायुधंचशक्तिंच
९ शार्ङ्गमायुधमुत्तमं खड्गंचमेत्रि
शूलंचपटिसंमुद्गरंतथा १४ दैत्या
नांदेहनाशायभक्तानामभयाय
च धारयंत्यायुधानीत्थंदेवानां

चहितायवै १५ महावलेमहोत्सा
येमहाभयविनाशिनी त्राहिमांमा
देविडुष्प्रेक्षेशत्रूणांभयवर्धिनी
१८ प्राच्यांरक्षतुमामैंद्रीचाग्नेयां
मेघवाहना दक्षिणस्यांतुवारा

क ह्रीनैऋत्यां वज्रधारिणी १७ प्रती
१ च्यां वारुणी रत्नेहायव्यां मरगावा
हना रक्तोडदीच्यां कौमारी ह्रैशा
न्यां शूलधारिणी १८ ऊर्ध्वब्रह्मा
णी मेरुदेदयस्मा हैस्रवीनथा

एवंदशदिशोरक्षेच्चामुंडाशिववा
हना १९ जयामेवाग्रतापातुविज
यापातुपृष्ठतः अजितावामपार्श्वे
तुदक्षिणेचापराजिता २० शिखा
मुद्योतिनीरक्षेदुमामूर्ध्निव्य ।

क वस्थिता मालाधरीललाटंचभ्रु
८ वोरक्षेद्यशस्विनी २१ त्रिनेत्राने
त्रयोर्मध्येयमघंटाचनासिकौ
शंखिनीचक्षुषोर्मध्येश्रोत्रयोर्द्वा
रवासिनी २२ कपोलौकालिका

ह्रेंकर्णमूलेशुभंकरी नासिका
यांसुगंधाचयूर्ध्वमोष्ठेवटीश्वरी २३
ह्रेंम्ममसदादेवीत्युत्तरोष्ठेचच।
र्चिका अधरेचामृतकलाजिह्वायां
चसरस्वती २४ दंतान्रक्षतु

क
५
कौमारीकण्ठमध्येचचर्चिका छे
ढिकायांचित्रघंटामहामायाच
तालुकं २५ कामाख्याचिडुकं र
देहावंमेसर्वमंगला ग्रीवायां
मह्रकालीचपृष्ठवंशेधयनुधरा २८
9

नीलग्रीवाकंठरूपंनालिकानडु
क्रुवरी ह्रुंदोरवङ्गाधरारहेहाहूमे
वज्रधारिणी २७ ह्लौंह्रौंघ्राक्रिह
लावचंडीहसांगुलीष्ठव नखान
ष्लेष्मरीरहेंक्रौरहेंक्कलेष्म

क री २८ स्तनैरहेन्महादेवीमनःशोक
१· विनाशिनी हृदयेललितादेवीउ
दरसिंहवाहना २९ नाभिकादबि
नीरहेस्कंदशाकंबरीतथा गुलं
गुह्येश्वरीरहेत्स्फिटोमेगुह्यके।

श्वरी ३। भूतेश्वरीत थामेढंजहूमे
सिंहवाहना कसोभगवतीरद्वेदे
वीमहिषवाहना ३। जेगेमहावा।
लारद्वेत्सर्वकामप्रदायिनी पाद
योनार सिंहीवपादपृष्ठेन्हनैजमी ३।

कः पादांगुलीःमेश्रीरक्षेपादायस्थल
११ वासिनी करालिनीनखानरक्षे
त्मणिवंधोस्तुकेशिनी ३३ रोमकू
पाणिकौमारीत्वचंवागीश्वरीतथा
रक्तवसामज्जामांसान्यस्थिमेधां

सिपार्वती ३४ श्रृंखागिकालरात्रित्ति
पिनेवसुकूटेश्वरी पद्मावतीप
स्मकोशीकवांस्त्रूडामणिलपा ३५ ज्वा
लामुखीनमाज्वालमभेघामवैसे
षिश्रु श्रुकंरत्ननवलाणीछायां

क चक्रेश्वरीतथा ३८ अहंकारंनमेवु
१२ द्धिंरक्षेन्मासर्वधारिणी प्राणापानौ
समानंचउदानेव्यानमेवच ३९
नागंकूर्मंचकृकरंदेवदत्तंधनंज
यम् यशःकीर्तिंचलक्ष्मींचसदा

रत्नवैष्णवी ३८ गोत्रमैंज्ञाणिमेर
ह्नेत्पभृन्मेरत्नचंडिके पुज्ञानरत्नम
हादेविभार्यारत्नवैष्णवी ३९ वज्र
ह्मेरत्नसर्वप्राणकल्पसुशोभनी
रसंत्रूपेनग्यागंपंशाहृंस्पशींचयोनि

क
१३ नौ ४ सर्वरजस्तमोरक्षेनाराय
णित्रमात्मिकी प्राणरक्षन्तवाराही
धर्मरक्षन्तवैस्नवी ४२ यनेश्वरीयन्तं
रक्षेकौमारीकन्यकालक्ष्मा मार्गेरक्षे
मेकरीरक्षेविजयासर्वनाःस्थितः ४ २

13

रक्षाहीनंतुयत्स्थानंकवचेनतुवर्जि
ते तत्सर्वंरक्षमेदेविजयत्वंपाप
नाशिनी ४३ रक्षमेसर्वगात्राणि
दुर्गेदुर्गप्रतारिणी सर्वरक्षाकरं
पुण्यंकवचंसर्वदाजपेत् ४४

क इदंरहस्यंविप्रर्षेभक्त्यानवमयोदित
१४ म् पदमेकंनगछेत्तुयदीछेछुभ
मात्मनः ४५ कवचेनावृतोनित्यं
यत्रयत्रावतिष्ठति तत्रतत्रार्थ
लाभश्चविजयासर्वकामिकाः ४६

14

यंयंकामयतेकामंतंतंप्राप्नोतिली
लया परमैश्वर्यमतुलंप्राप्नोतिभूत
लेप्रमातृ ४७ निर्भयोजायतेमर्त्य
संग्रामेष्वपराजितः त्रैलोकीचभ
वेत्पूज्यःकवचेनावृतेसदा ४८

क इदंतदेव्याकवचंदेवानामपिदुर्ल

१५ भं यःपठेत्प्रयतोनित्यंत्रिसंध्यंश्र

15 द्धयान्वितः ४९ देवीकलाभवेत्त

स्यत्रैलोक्येचापराजिता जीवेद्व

र्षशतंसाग्रंसर्वव्याधिविवर्जितः ५

नश्यंतिव्याधयः सर्वैर्लूताविस्फोटका
दयः स्थावरंजंगमंचैववृश्चिकविषं
वापियाहिवम् ५१ अभिचाराणिसर्वा
णिमंत्रयंत्राणिभूतले भूचराखे
चराचैवऊलजाश्चोपदेशजाः ५२

क
१९

सहजाकृत्रिमाश्चैव यक्षिण्यश्चाप
देशकः प्रेतरिक्तवराचोराडाकि
न्यश्च महाबलाः ५३ भूतग्रहपिशा
चाश्च यक्षगंधराक्षसः ब्रह्मराक्ष
सवेतालाकुष्मांडाभैरवादयः ५४

नष्टंपतिंदर्शनात्तस्यकवचेनाहतोहि
यः मनोमतिभवेज्ज्ञात्वातेजोवृद्धि
करंभवेत् ५५ यशोवृद्धिर्भवेत्सौख्यं
कीर्त्तिवृद्धिश्चजायते देहांतेपरमं
स्थानंयत्सुरैरपिदुर्लभम् ५८

क १७ 17 तस्पदं समवाप्नोति चंडिकायाः प्रभा
वतः यस्त्विदं कवचं स्मृत्वा संग्रामेषु
विशेन्नरः ५७ सतिजित्वारिपून्स
र्वान्कल्याणीगृहमाविशेत् ३ इदंत
देव्याःकवचं यः पठेन्नियतःसदा ४ ८

सर्वपापविनिर्मुक्तोदेवीलोकंस
गच्छति तस्माज्जपेत्सदाभक्त्याकव
चंकामदंमुने ५९ जपेत्सप्तशतींच
ण्डीकृत्वाकवचमादित्वा निविघ्ने
नभवेत्सिद्धिश्चंडीजपसमुद्भवः ६०

क यावद्भूमंडलंचैवसशैलवनका
१८ ननम् तावत्तिष्ठतिमेदिन्यांजप
18 कस्यसंततिः ८१ इतिश्रीहरिह
रब्रह्माविरचितेदेवीकवचंसंपूर्णा
म ॥

ॐ मः ङि यै ॐजयंतीमंगलाका
लीभद्रकालीकपालिनी दुर्गाक्षमाशिवा
धात्रीस्वधास्वाहानमोस्तुते १ महिषा
सुरनिर्णाशिविधात्रवरदेनमः रूपंदेहि
जयंदेहियशोदेहिद्विषोजहि २ मधुकै

दु॰ टभविद्राववियात्रवरदेनमः रूपंदेहिज
२ यंदेहियशोदेहिद्विषोजहि ३ रक्तबीजव
धेदेविचंडमुंडविनाशिनी रूपंदेहिजयं
देहियशोदेहिद्विषोजहि ४ निसुंभसुं
भनिर्नाशवियात्रवरदेनमः रूपंदेहि

जयंदेहियशोदेहिद्विषोजहि ५ अचिंत्य
रूपचरितेसर्वशात्रुविनाशिनी रूपंदे
हि ६ वंदितांघ्रियुगेदेवेदेविसौभाग्यदा
यिनी रूपंदेहि ७ नतेभ्यःसर्वदाभक्त्या
चंडिकेदुरितापहे रूपंदेहि ८ स्तुवद्भ्यो

सु. भक्तिपूर्वंत्वांचंडिकेव्याधिनाशिनि रूपंदे
२ हि ९ चंडिकेसततंयेत्वामर्चयंतीहभक्तितः
रूपंदेहि १० देहिसौभाग्यमारोग्यंदेहिदे
विपरंसुखं रूपंदेहि ११ विधेहिद्वि
षतांनाशंविधेहिबलमुच्चकैः रूपंदेहि १२

वियेह्निदेविकल्याणंवियेह्निविपलांश्रि
ये हूपंदेह्नि १३ सहस्रशिरोरत्ननिर्हष
चरणंविके हूपंदेह्नि १४ विद्यावंतेयश
स्वंतेलक्ष्मीवंतेवमाक्रह हूपंदेह्नि १५
वनवेक्रैचनवेक्रसंस्तुतेपरमेश्वरि २

भ्र॰ पंदेहि १८ प्रचंडदैत्यदर्पघ्ने चंडिकेप्रणता
३ यमे रूपंदेहि १२ कृष्णेनसंस्तुतेदेविशश्व
३ द्भक्त्यासदांबिके रूपंदेहि १८ हिमाचल
सुतानाथपूजितेपरमेश्वरि रूपंदेहि १९
इंद्राणीपतिसद्भावपूजितेदृष्टमेजाति

रूपंदेहि २० देविप्रचंडदोर्दंडदैत्यदर्पवि
नाशिनी रूपंदेहि २१ पत्नींमनोरमांदेहि
मनोहृत्तानुसारिणीं तारिणींदुर्गसंसार
सागरस्यकुलोद्भवां २२ इदंस्तोत्रंपठित्वा
तुमहास्तोत्रंपठेन्नरः सतुसप्तशतीसं

ग्रं. ४

ग्योफलमाप्नोतिसंपद २३ २ श्री गी
ताहेसंपूर्णम् ॥

ॐ मः ड़ि भ वस्पै विशुद्धज्ञानदेहा
यत्रिवेदेदिव्यचक्षुषे श्रेयःप्राप्तिनिमित्ता
यनमःसोमार्धधारिणे १ सर्वमेतहतंथे

नमेत्राणामपिकीलनं मोपिह्नेममवा
मोतिमनन्नेजाप्यनत्परः २ सिद्धेस्तवाट
नादीनिवस्तूनिमकलान्यपिपतेनस्तव
नोनित्यंस्तोत्रपाठःप्रसिद्यति ३ नमेत्रो
नौषधंनत्रनकिंचिदपिसिद्धति विनैत

कौ. त्सिद्धतेयेनसर्वमुच्चाटनादिकं ४ समग्रा
५ णपिसिद्ध्यन्तिलोकेशेकामिमोहरं कृत्वा
निमंत्रयामासमर्वैमेवविधंशुभं ५ स्तोत्रं
वैचंडिकायास्तत्त्वगृह्यंचकारसः समा
प्नोतिसद्गुणोपन्नंतेनतथावणिमंत्रणान ८

सोपिक्षेममवाप्नोतिसर्वमेवनसंशयः
कृष्णाष्टम्यांवचतुर्दश्यानवम्यांवासमाहि
तः ७ ददातिप्रतिगृह्णातिनान्यथैषाप्र
सीदति इत्थंरूपेणकीलेनमहादेवेन
कीलिता ८ योनिष्कीलांविधायैनांनित्यं

की
८
6

जपतिमस्फुट रामिद्धःसगणःसोपिगंथ
वैंजायतेवने नचैवापिटनस्तस्यभयंकु
त्रापिजायते नापिसस्यवंशोयातिसतो
मोहमवाप्नुयात् ८ ज्ञात्वाप्रारभ्यकुर्वीत
लकुर्वाणोविनश्यति ततोज्ञात्वे

वंशपत्रमिदं प्रारभ्यते बुधैः ॥ सौभाग्या
दिवयत्किंचिद्दृश्यते ललनाजने तत्सर्वं
तत्प्रसादेन ततो जात्यमिदं शुभं ॥ श्रावै
लज्जप्यमानेस्मिन्क्षोवे संपत्तिरुच्चकैः म
वत्येवसमग्राप्यनतः प्रारभ्यमेवहि ॥

श्री
८

ऐश्वर्यंयत्प्रसादेनसौभाग्यारोग्यसंपदः
शत्रुहानिःपरोमोक्षःस्तयनेमानकि
ज्जनै ३ श्री ग त्या ल स
मम ॥ शुभम् ॥

चं.
१

ॐ श्रीगणेशायनमः॥ ॐनमःचंडिका
यै॥ ॐअस्यश्रीसप्तशतिकामाला॰
मंत्रस्यप्रथमचरित्रस्य॥ ब्रह्माऋषि
र्गायत्रीछंदः॥ महाकालीदेवता
नंदजाशक्तिः॥ रक्तदंतिकाबीजं॥ अ

म्रितं यजुर्वेदमूर्तिमयीमहा
कालीश्रीत्पर्थेयमोकाममेतार्थे
ममशांतिकापाठविनियोगः अ्रथ
गायत्रीवीजत्रयायविद्महे नत्सथा
नायदेमहितन्नःशक्तिःप्रचोदयात

वे॰ २ अथध्यानं॥ ओंखड्गंचक्रगदेषुचापप
रिघाछूलंभुसुंडींशिर॥ शंखंसंदध
तींकरैस्त्रिनयनांसर्वांगभूषावृतां॥
यामस्तौत्स्वपितेहरौकमलजोहं
तुंमधुंकैटभं॥ नीलाश्मद्युतिमास्य

पादद्शकोमेवोमह्राकालिको॥ १॥
तपस्येनेमहात्मानेमाकोंडेयम
हामुनिः। आमशिष्योमहातेजा
जैमुनिश्रतिपछ्नतिः॥मार्कंडेयउवा
च॥२॥सावर्णिःसूर्यतनयोयोमतुः

ब॰ ३ कथ्यतेष्टमः निशामयतदुत्पत्तिं॰
विस्तराद्गदतोमम २ महामायाप्रभा
वेनयथामन्वन्तराधिपः सबभूवम
हाभागःसावर्णिस्तनयोरवेः ३ स्वारो
चिषेऽन्तरेपूर्वंचैत्रवंशसमुद्भवः॰

मत्स्योनाममराजाभूऽस्ममस्मेह्नि·
तिमंडले ४ तस्यपालयतःसम्य
कप्रजाःप्रजानिर्वैरमात् बभूबुः
शत्रवोभूपाःकोलाविध्वंसिनस्त
था ५ तस्यैतेरभवत्पुत्रमतिप्रव

च·
५

लंदडिनः म्लैनेरपिमनैनेथुडैको
लाविधेसिभिजितः ९ ततःस्वग
रमायातोनिजदेशाधिपोभवत
आक्रांतःसमस्तभागालेस्लदाग्रवलागि
भिः २ श्रमासेवेलिभिडेष्टुईवेलस्प

दुरात्मभिः कोशोवलंचापहृतं
तत्रापिस्वपुरेततः ८ ततोमृग
याव्याजेनहृतस्वाम्यःसभूपतिः
एकाकीहयमारुह्यजगामगहनं
वनं ९ सतत्राश्रममद्राक्षीद्द्विजव

च. येस्पमेथस प्रशोनस्थापस्ताकीर्ण
५ मुनिशिष्योपशोभिते ९ नैस्या।
5 किंचित्सकालंवमुनिनातेनसत्कृ
तः इतश्चेतश्चविचरन्तस्मिन्म
निवाश्रमे ॥ सोचिंतयनदातउ

ममत्वाकृष्टचेतनः मत्पूर्वैःपा
लितंपूर्वंमयाहीनंपुरंहितत ॥
मद्भृत्यैस्तैरसद्वृत्तैर्धर्म्मतःपाल्यते
नवा नजानेसप्रधानोमेशूरहस्ती
सदामदः ॥ ममवैरिवशंयातः ।

वे· ६ कान्भोगानुपलभ्यते येममानुग
तानिसंप्रसादयनभोजनैः १४ श्र
6 द्धनिष्फवंतेयकुर्वंस्मम्नमहीभृता
श्रमस्म्रण्यपशीलैलैः ऊर्ध्वद्भिः सत
तेभ्यं १५ सेवितः सोतिडः खिन

क्षयं कोशो गमिष्यति एतच्चान्यच्च
सततं चिंतयामास पार्थिवः १६ त
त्र विप्राश्रमाभ्यासे वैश्यमेकं ददर्श
सः स पृष्टस्तेन कस्त्वं भो हेतुश्चाग
मनेऽत्र कः १७ सशोक इव कस्मा

व:
१

नेउर्म्मेनारवलत्तसे इग्गाकर्णव
वलसम्भूयते:श्रणयोर्हिते १८ श्र
सवाच मतवैशंपः श्रभ्रयावनतो
त्पं १९ ॥ वैशंपउवाच ॥ २० ॥ समापि
तौमेवैशंपाहमत्पभावयतिनोक्तले २१

पुत्रदारैर्निरस्तश्च धनलोभादसा
धुभिः विहीनःस्वजनैर्दारैःपुत्रैःपु
त्रैरादायमेधने २२ वनमभ्यागतो
दुःखीनिरस्तश्चाप्तबन्धुभि सोहंन
वेद्मिपुत्राणांकुशलाकुशलात्मिको २३

चं.
८

प्रवृत्तिस्वजनानांचदाराणांचात्रसं
स्थिते किन्नुतेषांगृहेक्षेममक्षेमं
किन्नुसांप्रतं २४ कथंतेकिन्नुसद्वृत्ता
दुर्वृत्ताःकिन्नुमेसुताः २५ ॥राजोवाच
२६ यैर्निरस्तोभवांलुब्धैःपुत्रदारा

दिभिर्यथैनैः॥२७॥नैष्ठुकिंभवतःस्नेह
मनवआतिमानसः॥२८॥वैशंपउवा
च॥२९ एवमेनयथाप्राह्भवान
स्मङ्कृतंवचः १ किंकरोमिनवआ
तिममनिष्ठुरतोमनः पेःसंमज

चे.
९८

पितस्नेहं पनलेभे निराकृतः ११
पतिःस्वजनहार्दं च हार्दितेष्वेव
मेमनः किमेतन्नाभिजानामिजा
नन्नपिमहामते १२ यत्प्रेमप्रवणं
चिंतंविगुणेष्वपिबंधुषु ::

तेषांकृतेमेनिःश्वासोदौर्मनस्यंचजा
यते॥३३॥करोमिकिंयन्नमनस्तेष्वप्री
तिषुनिष्ठुरं॥३४॥मार्कंडेयउवाच॥३५॥
ततस्तौसहितौविप्रतंमुनिंसमुप
स्थितौ ३६ समाधिर्नामवैश्योसौस

वे. वपार्थिवसत्तमः॥ कृत्वाजैतोयथा
९ मांयथयणार्हंतेनसंविदम्॥१७॥उप
10 विष्टाकथाःकाश्चिद्वक्रतैर्वैशपपा
यिवै॥१८॥राजोवाच॥१९॥भगवं
स्तामहेइहभिक्षामेकेवदसतत ४.

दुःखाययन्मेमनसःस्वचित्तायत्त
ताविना ममत्वंगतराज्यस्यराज्या
ङ्गेष्वखिलेष्वपि ॥५१॥ जानतोपिय
थाज्ञस्य किमेतन्मुनिसत्तम ॥ अयं
चनिकृतःपुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥५२॥

वे. ॥ स्वजनेनचसंत्यक्तस्तेषुहार्दीतथा
प्यति एवमेषतथाहंचद्वावप्यत्य
न्तदुःखितौ ४२ दृष्टदोषेपिविष
येममत्वाकृष्टमानसौ तत्किमेत
न्महाभागयन्मोहोज्ञानिनोरपि ४ ४

ममास्यचभवस्येषांविवेकोयस्य
मूढता।।४५।।ऋषिरुवाच।।४६ ज्ञान
मस्तिसमस्तस्यजंतोर्विषयगोचरे ४१
विषयश्चमहाभागयातिचैवंपृथ
कपृथक दिवांधाःप्राणिनःकेचिद्र

वे. त्रावंधास्तथापरे ४८ केचिद्दिवात
१२ थारात्रौप्राणिनस्तुल्यदृष्टयः ज्ञानि
नोमनुजाः सत्यंकिंत्वतेन हि केवले
४९ यतोहिज्ञानिनः सर्वेपशुपक्षिमृ
गादयः ज्ञानंचतन्मनुष्याणां ॥

घनेषां स्तगणपतिणं ५ मनुष्याणं
चयनेषांन्तल्पमनुष्यलक्षणोभयोः स्ना
नेपि समनिपशैपनाम्पनेगोंक्षा वचेत्र
त्र ५ कणमोलाहनाम्मोह्रामीउ
मानानपिलया मानुषामनुजन्मात्र

चे. साभिलाषाःसुतान्प्रति ५२ लोभात्प्र
१२ त्युपकाराय नन्वेतान्किन्न पश्यसि
तथापिममतावर्त्तेमोहगर्त्तेनिपा
तिता ५२ महामायाप्रभावेनसंसार
स्थितिकारिणाः तन्नात्रविस्मयःकार्यो

13

योगनिद्राजगत्पतेः ५४ महामा
याहरेश्चैषातयासंमोह्यतेजगत्
ज्ञानिनामपिचेतांसिदेवीभगवती
हिसा ५५ बलादाकृष्यमोहायम
हामायाप्रयच्छति तयाविसृज्यते

दे.
१४

विश्वंजगदेतच्चराचरं ५८ सैषाप्रस
न्नावरदानृणांभवतिमुक्तये सावि
द्यापरमामुक्तेर्हेतुभूतासनातनी ५९
संसारबंधहेतुश्चसैवसर्वेश्वरेश्वरी ६०
राजोवाच ॥६१॥ भगवन्काहिसादेवीमहा

ब्रवीतिकथमुत्पन्नासाकर्मास्याश्च
किंद्विज॥यत्स्वभावाचसादेवीयत्स्व
रूपायदुद्भवा॥४५॥तत्सर्वंश्रोतुमिच्छा
मित्वत्तोब्रह्मविदांवर॥४६॥ऋषिरुवा
च॥४७ नित्यैवसाजगन्मूर्तिस्तया

दे. १५ 15

सर्वमिदंततं ६४ तथापितत्समु
त्पत्तिर्वहुधाश्रूयतांमम देवानांका
र्यसिद्ध्यर्थमाविर्भवतिसायदा ६५ उ
त्पन्नेतितदालोकेसानित्याप्यभिधी-
यते योगनिद्रांयदाविष्णुर्जगत्येका

णवीकृते ९९ आस्तीर्य्यशेषमभज
त्कल्पान्ते भगवान्प्रभुः तदाद्वावसु
रौघोरौविख्यातौमधुकैटभौ ९७ वि
ष्णुकर्णमलोद्भूतौहंतुंब्रह्माणमुद्य
तौ सनाभिकमलेविष्णोस्थितोब्रह्मा

चे. प्रजायति: ६८ दृष्टान्तावस्थं
९ गैचैग्रोप्रसभेद्यजनार्दनम्
नष्टावयोगानिङ्गतामेकाग्रह
16 दयस्थितः ६९ विवोयना
यायहरेहरिनेत्रक्क ॥ ॥

नालयं॥ विश्वेश्वरींजगद्धात्रींस्थि-
तिसंहारकारिणीं॥ ७०॥ स्तौमिनिद्रां
भगवतींविष्णोरतुलांतेजसः॥ ७१॥ ब्र
ह्मोवाच॥ त्वंस्वाहात्वंस्वधात्वंहिवषट्का
रःस्वरात्मिका॥ ७२॥ सुधात्वमक्षरेनि

दे.
९

त्रिधामात्रात्मिकास्थिता अर्द्धमा
त्रास्थिता नित्या यानुच्चार्या विशेषतः २४
त्वमेव सा त्वं सावित्री त्वं देवी जननी
परा त्वयैतद्धार्यते विश्वं त्वयैतत्सृ
ज्यते जगत् २५ त्वयैतत्पाल्यते देवि

17

त्वमत्स्यतेचसर्वदा विसृष्टौसृष्टिरू
पात्वंस्थितिरूपाचपालने ७६ तथा
संहृतिरूपांतेजगतोस्यजगन्मये
महाविद्यामहामायामहामेधामहा
स्मृतिः ७७ महामोहाचभवतीमहा

दे. देवीमहेश्वरी प्रकृतिस्त्वंचसर्वस्य
१८ गुणत्रयविभाविनी ७८ कालरात्रि
महारात्रिर्मोहरात्रिश्चदारुणा त्वं
श्रीस्त्वमीश्वरीत्वंह्रीस्त्वंबुद्धिर्बोधलक्ष
णा ७९ लज्जापुष्टिस्तथातुष्टिस्त्वंशांतिः

18

ता निरेवच खड्गिनी शूलिनी घोरा
गदिनी चक्रिणी तथा ८ शंखिनी
चापिनी बाणा भुशुंडी परीघायुधा
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसु
न्दरी ८२ परापराणां परमा त्वमेवप

चं॰ १९

19

रमेश्वरी यच्च किंचित्क्वचिद्वस्तु सदस
द्वाखिलात्मिके ८२ तस्य सर्वस्य या
शक्तिः सा त्वं किं स्तूयसे तदा यया त्व
या जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ८३
सोपि निद्रावशं नीतः कस्त्वां स्तोतुमिहे

श्वरः विष्णुः शरीरग्रहणमहमी
शानप्रवच ८४ कारितालेयतोत
स्नाकःलोतेशक्तिमान्भवेत् सात
मिस्त्यप्रभावैःस्वैरुदारैर्देविसंस्तुता ८४
मोहयेनोड्डरापर्वावमसेरोमयुकेट

वं. भै॥प्रबोधंचजगत्स्वामीनीयताम
२: च्युतोलघुः॥८६॥बोधश्चक्रियतामस्य
४० हेतमेतौमहासुरौ॥८७॥ऋषिरुवाच॥ ८८
एवंस्तुतातदादेवीतामसीतत्रवे
दसा ८९ विस्नोःप्रबोधनार्थायनिह

न्तुंमधुकैटभौ नेत्रास्यनासिकाबा
हुहृदयेभ्यस्तथोरसः ५० निर्गम्य
दर्शनेतस्थौब्रह्मणोव्यक्तजन्मनः
उत्तस्थौचजगन्नाथस्तयामुक्तोजना
र्दनः ५१ एकार्णवेहिशयनात्ततः

दे॰ सददृशेवतौ मधुकैटभौदुरात्माना
२१ वतिवीर्यपराक्रमौ ९२ क्रोधरक्तेक्ष
२ णावत्तुंब्रह्माणंजनितोद्यमौ समु
त्थायततस्ताभ्यांयुयुधेभगवान्हरिः
९३ पंचवर्षसहस्राणिबाहुप्र॰

ह्रणोविभुः॥नावप्यतिवलोकंतो
महामायाविमोहितो॥४४॥उद्धव
नैवरोस्मनोव्रियतामितिकेशवे॥४ ५॥
श्रीभगवानुवाच॥४६॥ भवेन्नामघमे
नष्टोममवध्यावुभावपि ४७ किम

दे. २१ मेनवरेणात्रएतावद्धिवृतंमम ८८
ऋषिरुवाच॥ ५५॥ वंचिताभ्यामितित
दासर्वमापोमयंजगत् ९० विलोक्य
ताभ्यांगदितोभगवान्कमलेक्षणः आ
वांजहिनयत्रोर्वीसलिलेनपरिप्लुता ९१

ऋषिरुवाच॥७२॥तथेत्युक्ता भगव
ताशंखचक्रगदाभृता कृत्वाचक्रे
णवैछिन्नेजघनेशिरसीतयोः ७३
एवमेषासमुत्पन्नाब्रह्मणासंस्तुता
स्वयं प्रभावमस्यादेव्यास्तुभूपःशृ

दे. एवदामिते १४ सांगायेवाग्भववी
१३ जाधिष्ठात्र्यैमहाकाल्यैमहाऋतिसम
93 र्पयामिनमःस्वाहा ॥ इतिश्रीमार्कंडेय
पुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्ये
मधुकैटभवधोनामप्र ।:।:

पमोध्यायः॥॥ग्रथध्यानं॥ ॐअतःस
कपरस्रुगदेषुकुलिशंपद्मंधनुः
कुण्डिकां दण्डंशक्तिमसिंचचर्मज
लजंघंटांसुराभाजनं शूलंपाशसु
दर्शनेचदधतींहस्तैः प्रवालप्रभां

दे. सेवेसैरिभमर्दिनीमिहमहाल
२४ क्ष्मींसरोजस्थितां॥२॥ऋषिरुवाच॥१॥
देवासुरमभूद्युद्धंपूर्णमब्दशतंपु
रा महिषेसुराणामधिपेदेवानां
चपुरंदरे १ तत्रासुरैर्महावीर्यैर्दे

वैमैत्रेपराजिते जिनावसकला
देवा निर्ल्होभून्म ह्रिघासुरः ३ त
नःपराजिता देवाःपद्मयोनिं प्रजा
पतिं पुरस्कृत्य गतालत्रयत्रेशाग
रुडध्वजो ४ यथाहतेनयोल्लङ्म

वे.
२५ ऱिषास्तरवेष्टिते विरश्मा:कश्यपा
मासैर्देवाभिभवविस्तरे ५ सूर्य्य
95 ल्लायुतिलैंहूनोयमस्यवक्रणस्यव
श्रेषाकाधिकारान्तः स्वयमेवाधि
तिष्ठति ६ स्वर्णात्रिशाकृताः सर्वेते

नदेवगणाभुवि विचरंतियथा
मर्त्यामहिषेणदुरात्मना ७ एत
द्वःकथितंसर्वममरारिविचेष्टितं
शरणंवःप्रपन्नास्मोवधस्तस्यवि
चिंत्यतां ८ इत्थंनिशम्यदेवानांव

व· वंस्मिमधुसूदनः वकारकोपंशंख
२९ खभुजटीकुटिलाननौ ४ ततोन्तिको
96 पपूर्णस्यचक्रिणोवदनाननः निश्र
क्राममहतेजोब्रह्मणः शंकरस्य
व ५ अन्येषांचैवदेवानां ::

शक्रादीनां शरीरतः निर्गतसम
स्तेनस्तेवैकं समगच्छत ॥ १३ अती
वतेजसः कूटं ज्वलन्तमिव पर्वतं
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदि
गन्तरं ॥ १२ अतुलं तत्र तत्तेजः सर्वदे

वे॰ २२

27

वशरीरजे पकस्यतदमृतारीणा
मलोकत्रयनिषा १३ घदमृतोभ
वैतेजलेनाजायतननम्नवि घामे
नवाभवन्केशावाहवोविसृतेजसा
१४ सोमेनस्तनैयोर्युग्मेमध्यंवेदे

णचाभवत् वारुणेनचजंघोरू
नितंवौतेजसाभुवः १५ ब्रह्मणस्ते
जसापादौतदंगुल्योर्कतेजसा व
सूनांचकरांगुल्यः कौवेरेणचनासि
का १६ तस्यास्तुदंताःसंभूताःप्राजाप

दे.
१८

28

त्येनतेजसा नयनत्रितयंजज्ञेत-
थापावकतेजसा ९ भ्रुवौचसंध्य-
योस्तेजः श्रवणावनिलस्यच अन्येषां
चैवदेवानांसंभवस्तेजसांशिवा ९
ततःसमस्तदेवानांतेजोराशि-

समुद्भवो नोविलोक्यमुद्दशाष्टरम
णमहिषार्दिताः १९ मूलंमूलादि
निष्कृष्यदंदीनसेपिनाकएक च
केचदमवात्कलसः समस्तासस्ववक्र
नः २ शोत्वंवकृणःशक्तिंदंदीनसे

वे.
२५ ऊताशनः मारुतोदन्नवोश्वापंवाण
29 शूलीतथेतुधी २१ वज्रमिन्द्रःसमु
मात्यकुलिशादमराधिपः दंडेनसं
महूस्वतोचंदाभैरावताङ्कजात २२
कालदंडायमोदंडेपाशेवाग्नुपः

तिर्ददौ प्रजापतिश्चाक्षमालांददौ
ब्रह्माकमण्डले २१ समस्तरोमकू
पेषु निर्जरश्मीद्दिवाकरः कालश्च
दत्तवान्खड्गंतस्याश्चर्मचनिर्मलं २४
क्षीरोदश्चामलेहारमजरेचतथाम्ब

चे. रे चूडामणिनयाद्विंयेऊाउलेकट
१. कानिव २५ श्रइचेंदनयाग्रंभेके
सरान्सर्वेवाऊस्तु न्रुपेरोविमलोत
उडैवेयकमनुतमं २६ श्रंगुलीय
करत्नानिसममलांसंगुलीस्तव ।

विश्वकर्म्मादद्दौतेनसैपरस्तुंवातिनि
मिले २७ अस्मााापनेकरूपानित
थाभेयंचदंशने अम्लानपेकजोमा
लेशिरस्थरसिवापणे २८ अद्दज
लपिस्नसैपंकजेचानिशोभने हि

दे. मवान्वाहनंसिंहंरत्नानिविविधा
२१ नि च २९ ददावशून्यंसुरयापानपा
31 त्रंधनाधिपः शेषश्चसर्वनागेशो
महामणिविभूषितं ३० नागहा
रंददौतस्यैधत्तेयःपृथिवीमिमां ॰

अन्यैरपिसुरैर्देवीभूषणैरायुधैस्त
था ३१ संमानिताननादोच्चैःसाट्ट
हासंमुहुर्मुहुः तस्यानादेवघोरण
कृत्स्नमापूरितेनभः ३२ अमाय
तातिमहताप्रतिशब्दोमहानभूत

वे. वित्रसुःसकलालोकाःसमुद्राश्च
३२ कंपिरे ॥ चचालवसुधाशैलाःसका
लाश्चमहीधराः जयेतिदेवाश्चमु
दाताःसस्रुःसिंहवीहिनी ३४ तद्
बुद्धेनयश्चैतांभक्तिनमात्मस्तुतेयः

दृष्ट्वासमस्तंसंक्षुब्धंत्रैलोक्यममरा
रयः ३५ सन्नद्धाखिलसैन्यास्तेसम
त्तस्थुरुदायुधाः आः किमेतदितिक्रो
धादाभाष्यमहिषासुरः ३६ अभ्यधा
वततंशब्दमशेषैरसुरैर्वृतः सद

दर्शनतो देवी ब्राह्मलोकत्रयोनि-
भा १७ पादाक्रोम्यानन्तभुवं किरी
टोल्लिखितांवरो नाभितांशेषपा-
तालोयजुर्ज्योतिःस्वेनेनता १८ दिशा
भुजसहस्रेणममेनाप्याप्यसंस्थिता

ततःप्रववृतेयुद्धंतयादेव्यासुर
द्विषां १९ शस्त्रास्त्रैर्वहुधामुक्तैरा
दीपितदिगंतरं महिषासुरसेना
नीश्चिक्षुराख्योमहासुरः २० युयु
धेचामरश्चान्यैश्चतुरंगवलान्वितः

वे. रण्यानामश्रुनैषड्भिरुद्याख्योमह
२४ ह्नरः श्रुत्यनाश्रुतानांचसह्रसे
34 णमहाह्रद पंचाशाड्भिस्त्रिनिश्रुते
रसिलोमामहाह्नरः ४२ श्रुता
नोशीतैःषड्भिर्वाष्कलोश्रुयुयेरणे

गजवाजिसहस्रौघैरनेकैः परिवा
रितः ५२ वृतो रथानां कोट्या च यु
द्धेतस्मिन्नयुध्यत विडालाख्योयु
तानां च पंचाशद्भिरथायुतैः ५४ यु
युधे संयुगे तत्र रथानां परिवारितः

वे. श्रमेवनज्ञापुतश्गोरष्यनागहूयेहे
३५ ना ४५ पुण्यपुः सेतुगोदेव्यासमहत
35 चमहासमा कोटिकोटिसह्रस्रेल
यानोदेतिनोतथा ४६ हयानोव
हतोपुडेनज्ञाभूत्कस्मिंघासहः नो

मरैर्भिंडिपालैश्च शक्तिभिर्मुसलै-
स्तथा ४७ युयुधुः संयुगे देव्या ख-
ड्गैः परशुपट्टिशैः केचिच्चिक्षिपुः
शक्तिः केचित्पाशांस्तथापरे ४८ देवी
खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः

चं.
२९

सापिदेवीननसाभिशासाणपसाणि
चंडिका ४९ लीलेयैवश्रविछेदनि
नशास्वासवर्षिणी अनायसाननना
देवीस्तूयमानासुरर्षिभिः ५. सुमोचा
मदेहेषुशास्वाणपसाणिवेश्वरी ।

30

सोपिक्रुद्धोधुतसटोदेव्यावाहनके
सरी ५१ चचारासुरसैन्येषुवनेष्वि
वहुताशनः निःश्वासान्मुमुचेयां
श्चयुध्यमानारणेंबिका ५२ तएव
सद्यःसंभूतागणाःशतसहस्रशः

चं. ष्टष्टस्तैपरशुभिर्भिंदिपालासिप
३२ ट्टिशैः ५२ नाशयंतोसुरगणान्देवी
37 शक्त्युपबृंहिता अवादयंतःपटहा
न्गणाः शंखांस्तथापरे ५४ मृदंगा
श्चतथैवान्येतस्मिन्युद्धमहोत्सवे ॥

ततोदेवीत्रिशूलेनगदयाशक्तिवृ
ष्टिभिः ५५ खड्गादिभिश्चशतशोनि
जघानमहासुरान् पातयामासचै
वान्यान्घंटास्वनविमोहितान् ५६
असुरान्भुविपाशेनबध्वाचान्यानकर्ष

चे. यत् केचिद्विद्याक्रान्तालीहैणः(खड्गपा

३९ नैस्तिष्णापरे ५७ विषोस्थितानिपातेन

गद्याभुविशेरते वेष्टश्चकेचिड्यि

रेष्टशालेनमृशेहताः ५८ केचिद्वि

पतिताभूमौमिन्नाः शूलेनवत्तसि ।

निरंतराः शरीरेण कृताकेविद्गणा
जिरे ५९ शेनानकारिणा श्राणाम
मत्तुस्त्रिदशादेना केषांविडाहवः
श्छिन्नाश्छिन्नग्रीवास्तथापरे ६० शिरा
सिपत्रवन्येषामन्येमध्येविदारिता

वे.
३९

विछिन्नजंघास्त्वपरेपिनष्टोमहा
त्मनाः ११ एकबाहुविवर्णाःके
चिदेवाद्विधाकृताः छिन्नेपिचान्येशि
रसिपतिताःशुनकुष्टिताः १२ कवे
यातुन्ध्रुदेव्यागरहीनपरमासुधाः

नन्दत्वस्यापरेतत्रगुह्येन्द्रण्यैलयाश्रि
ताः ९३ केवेधाच्छिन्नशिरसः स्वेङ
शस्त्रच्छिपाणायः निष्ठच्छितिभावे
नोदेवोमम्नेमहास्वराः ९४ पातिते
रण्यनागाश्चैरसौरैश्चवसंयराः स्र

वै. गम्यास्राभवनत्रयत्राभूत्सामहारणः
ध. ९५ शोणितोघामहानद्यःसस्रुस्तत्र
WO विस्रक्तुः मध्येचासुरसैन्यस्य वा
रणास्रवाजिना ९६ तणेनततन्म
हासैन्यमसुराणांनश्यांविका

निमित्तयेयथावह्निल्टणदाहमहा
वर्ये ९७ मवसिंहोमहानादमत्यु
जत्युतकेसरः शरीरेभ्योमरारीणा
मसृनिवविविल्वति ९८ देवागणे
श्वैतैलवक्रुतेप्रुडेमहासैरे येथे

दे॰ षोनहृत्तुर्देवाःप्रष्यह्वह्विमुवोदिवि
४५। ४९ सांगायैलक्ष्मीबीजाधिष्ठात्रेमहा
लक्ष्म्यैमहाहुतिंसमर्पयामिनमःस्वा
हा॥इतिश्रीमार्कंडेयपुराणेसावर्णि
केमन्वंतरेदेवी :: :: :: ::

महात्मे मह्रिशण स्वरसैम्य वधोना

महितीयोध्यायः॥२॥अथध्यानं॥ॐ

उद्यद्भाउसहस्रकांतिमरुणक्षौ

मांशिरोमाल्हिकांरक्तालिप्तपयोध

रांजपवटींविद्यामभीतिंवरां हस्ता

च. र्दधतींत्रिनेत्रविलसद्वक्त्रारविं-
४२ दश्रियंदेवींबद्धहिमांशुरत्नमुकु-
टांवंदेरविंदस्थितां॥२॥ऋषिरु-
वाच॥१॥निहन्यमानंतत्सैन्य
मवलोक्यमहासुरः॥

सेनानीश्चितरः कोपाद्ययौयोद्धुम
थाविकां २ सदेवीशरवर्षेणवव
र्षसमरेसुरः यथामेरुगिरेःशृंग
तोयवर्षेणतोयद २ तस्यछित्वा
ततोदेवीलीलयैवशरोत्करान् ।

व.
४१
43

जचानन्तरगान्वोगोर्यनारेचैववा ।
जिनो ४ विछेदवधनुःसयोधजे
चातिसञ्छिन्ने विमाधचैवगाबेष्
छिन्नयन्वानमाप्नुगे ५ सञ्छिन्नध
न्नाविरध्योहनाश्रोहनमारथि ।

अभ्यधावततोदेवीखड्गचर्मधरोसु
र॥१८॥ सिंहमाहत्वाखड्गेनतीक्ष्णधा
रेणमूर्धनि आजघानभुजेसव्ये
देवीमप्यतिवेगवान्॥९॥ तस्याख
ड्गोभुजंप्राप्यपफालनृपनंदनः

वे.
४४

ततोजग्राहशूलंसकोपादरुणलो
चन ८ चिक्षेपचततस्तत्तुभद्रका॰
ल्यांमहासुर जाज्वल्यमानंतेजोभी
रविबिंबमिवांबरात ९ दृष्ट्वातदा
पतच्छूलंदेवीशूलममुंचत ॰

तच्छूलेशानघातेननीतेसवमहा
सुरा। ८। हतेतस्मिन्महावीर्येमहि
षस्यचमूपतौ आजगामगजारू
ढश्चामरस्त्रिदशार्दनः॥ ११ सोपि
शक्तिंमुमोचाथदेव्यास्तामंविकाद्रु

वे.
४५

45

ते ऽकाराभिहतो भूमौ पातयामास
निःश्वमो ॥२॥ भग्नेशक्तिर्निपतितो
दृष्ट्वाक्रोधसमन्वितः विक्षेपचामरः
शूलंबाणैस्तदपिसाछिनत् ॥२॥ ततः
सिंहसमुत्पत्यगजकुंभांतरेस्थित ॥

वाऊथुडेनथुथुपेतेनोद्वेखिदशा
रिणा १४ थुप्यमानैनतनस्तैतन
स्माद्गागान्महिंगतै थुथुधातेतिसे
रडैश्वहारैरतिदारुणे १५ ततेनेवेगा
नवमृत्स्यनिपत्सवम्रगारिणा १

दे.
५८
45

करप्रहारेणशिरश्चामरस्यपृथक्कृते ८ उदग्रश्चरणेदेव्याशिलावृक्षादिभिर्हतः दंतमुष्टितलैश्चैव करालश्चनिपातितः ९ देवीक्रुद्धा गदापातैश्चूर्णयामासचोद्धतं

वाष्कलं भिंदिपालेन वाणैस्ताम्रंत
थांधकं १८ उग्रास्यमुग्रवीर्यंच तथै
वच महाहनुं त्रिनेत्रांच त्रिसूलेन ज
घान परमेश्वरि १९ विडालस्यासि
ना कायात्पातयामास वै शिरः २०

वं· रेडुर्मुर्विवोभौशोरेर्निन्येयमतये २·
५० पवंसलीयमाणेनुखैसेन्येमहिषा
47 सुर माहिषेणस्वरूपेणाज्ञासया।
मामतान्उणान् २१ काश्चितेड ष्ठा।
हारेणविरलैपैलधापरान् ।:

लो गूलनाडिनैास्त्रामानस्पृगाभ्याव
विदारितान् २२ वेगेनकाश्चिदपरा
नोदनभ्रमणेणनच निश्वासपवनेना
म्यामानयामासभूतले २३ निपात्य
प्रमथानीकमभ्यधावतसोसुरः १

वे. सिंहेहेतेमहादेव्याकोपंचक्रेततो
४८ विका २४ सोपिकोपान्महावीर्यः
48 खुरक्षुण्णमहीतलः शृंगाभ्यांपर्व
तानुच्चान्चिक्षेपचननादच २५ वेग
भ्रमणविक्षुण्णामहीतस्यव्यशीर्यत

लोगूलेनाहृतश्चाखि:लोवयामास
सर्वत: २९ भ्रुतहैगविभिनाश्चव
एंअवांअभुवैना श्वासानिलाल्ला
शतशोनिपतर्नभसोवला २२ इति
क्रोधसमाध्मानमापतेनेमहासौरे

दे॰ ५९

दृष्ट्वासाचंडिकाकोपंतद्धायधनुला
केनात् २८ सालिप्यानस्यैवेणाशौतं
ववेयमहासुरं तस्याजपाष्णिधरू
पेसोपिवज्रामहासुरे २९ ततःसिं
होभवत्सद्योयावनस्यांविकाशिरः

ह्विनतिनावस्त्रकृष्णः वज्रपाणिरह
श्यतः ३ ततप्रवास्त्रकृष्णदेवीः
विच्छेदसायकैः तेवज्रचर्मणवार्य
ततःसोभून्महीगजः ३१ करेणच
महासिंहेनेवचकर्षचगर्जेव कर्ष

दे. न्स्तकरंदेवीखड्गेननिरकृंतत ॥२
प. ततमहासुरोभूयोमाहिषंवपुरा
50 स्थितः तथैवक्षोभयामासत्रैलो
क्यंसचराचरम् ॥ ततःक्रुद्धा
जगन्माताचंडिकापानमुत्तमं

पैयोष्ठनःष्ठनैश्वैवजन्हामाकणलो
चना ३४ ननदावासरःसोपिवल
वीर्यमदोद्धतः विघास्माभ्योचविले
पचगिङ्कोप्रतिभूधरान् ३५ सावता
नष्टहितोसेनहूणियेनीशशेरकैः

दे.
५१

उवाचतंमदोद्धूतमुखरागाकुलाक्षरं
३७ ॥देव्युवाच॥३७॥ गर्जगर्जक्षणं
मूढमधुयावत्पिबाम्यहम् मया
त्वयिहतेत्रैवगर्जिष्यंत्याशुदेवताः ३८
ऋषिरुवाच॥ ३९ एवमुक्त्वासमुत्पत्य

51

मात्रुहांतमहासुरं पादेनाक्रम्यक
ण्ठेचशूलेनैनमताडयत् ४ ततः
सोपिपदाक्रांतस्तयानिजमुखात्ततः
अर्द्धनिःक्रांतएवाभिदेव्यावीर्येण
संवृतः ४१ अर्द्धनिःक्रांतएवासौयु

चं. डमानोमहासुरः तयामहासिना
५२ देव्याःशिरश्छित्वानिपातितः ४२ त
52 तोहाहाकृतंसर्वंदैत्यसैन्यंननाश
शतत् प्रहर्षंचपरंजग्मुःसकला
देवतागणाः ४३ तुष्टुवुस्तांसुरादेवी

सहद्दिव्यैर्महर्षिभिः॥ जगुर्गंधर्वप
तयोनृत्यन्त्यप्सरोगणाः॥ ५४॥ उ
सोगायत्र्यष्टाविंशतिवर्णात्मिका
यैमहालक्ष्म्यैमहाकृतिसमर्पया
मिनमः स्वाहा॥ इतिश्रीमार्कंडेयपु

दे· राणेसावर्णिकेमन्वंतरेदेवीमाहा
५३ त्म्येमहिषासुरवधोनामतृतीयो
53 ध्यायः॥३॥ अथध्यानं॥ ॐकालाभ्रा
भांकटाक्षैररिकुलभयदांमौलिब
द्धेंदुलेखांशंखंचक्रंकृपाणंत्रिशिखम

पिकरैरुद्वहंतींत्रिनेत्रां सिंहस्कंधा
धिरूढांत्रिभुवनमखिलंतेजसा
पूरयंतीं ध्यायेद्दुर्गांजयाख्यांत्रिद
शपरिवृतांसेवितांसिद्धिकामैः॥
ऋषिरुवाच॥१ शक्रादयःसुरगणा

चं. निहतेतिवीर्येतस्मिन्दुरात्मनिसुरा
५४ रिबलेचेदेव्यातेंतुष्टुवुःप्रणतिन
म्रशिरोधरांसावाग्भिः प्रहर्षपुल
कोद्गमचारुदेहाः २ देव्याययात
तमिदंजगदात्मशक्त्यानिः ॰

शेषदेवगणशक्तिसमूहमूर्त्या
तामंबिकामखिलदेवमहर्षिपू
ज्यांभक्त्यानतास्मविदधातुशुभा
निसानः १ यस्याःप्रभावमतुलंभ
गवाननंतोब्रह्माहरश्चनहिवक्तु

चं. मलंबलंच साचण्डिकाखिलज
५५ गत्परिपालनायनाशायचाशुभ
55 फलस्यमतिंकरोतु ४ याश्रीःस्व
यंसुकृतिनांभवनेष्वलक्ष्मीःपाप
त्मनांकृतधियांहृदयेषुबुद्धिः श्र

द्धासतांकुलजनप्रभवस्यलज्जा
तांत्वांनतास्मपरिपालयदेविवि
श्वं ५ किंवर्णयामतवरूपमचिं
त्यमेतत्किंचातिवीर्यमसुरक्षयका
रिभूरि किंचाहवेषुचरितानितवा

वे. नियानानिसर्वेषुदेव्यसुरदेवगण
५८ दिकेषु ९ हेतुःसमस्तजगतोत्रि-
56 गुणापिदोषैर्नज्ञायसेहरिहरादि
भिरप्यपारा सर्वाश्रयाखिलमि
दंजगदंशभूतमव्याकृताहि-

परमाप्रकृतिस्त्वमाद्या ७ यस्याः
समस्तसुरतामुदीरणेनतृप्तिं
प्रयातिसकलेषुमखेषुदेवि स्वा
हासिवैपितृगणस्यचतृप्तिहेतुरु
च्चार्यसेत्वमतएवजनैःस्वधाच ८

दे॰ या मुक्तिहेतुरविचिंत्यमहाव्रता त्व
मा॰ मभ्यस्यसे सुनियतेंद्रियतत्वसारैः
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदो
षैर्विद्यासि सा भगवती परमा हि
देवि ९ शब्दात्मिका सुविमलर्ग्य

57

जुषांनिधानमुद्गीथरम्यपदपाठ
वतांचसाम्ना देवीत्रयीभगवती
भवभावनायवार्ताचसर्वजगतां
परमार्त्तिहन्त्री ९ मेधासिदेविवि
दिताखिलशास्त्रसारादुर्गासिदु

वे॰ गेभवमागरनैारसेगा श्रीःकेठमा
५८ रिहृदैथैककृतनाथिवासायैारीव
58 मेवशशिमोलिकृतप्रतिष्ठा ॥ ३
घन्सहासममलेपरिपूर्णचेद्रवि
म्वात्तकारिकनकोनमकोतिकोते

अन्यद्भुतंप्रहृतमातकघातथापि
विलोक्यसहसामहिषासुरेण ११
दृष्ट्वातदेविकुपितंभ्रुकुटीकरा
लमुद्यच्छशांकसदृशाछवियन्नस
द्यः प्राणान्मुमोचमहिषस्तदती

दे॰ वचित्रंकैर्जीव्यतेहिकुपितांतक
५९ दर्शनेन ॥ देविप्रसीदपरमाभ
59 वतीभवायसद्योविनाशयसिको
पवतीकुलानि विज्ञातमेतदध
नैवयदस्तमेतन्नीतंबलंसुवि॰

पुलेमहिषासुरस्य ४ तेसंम॰
ताजनपदेषुधनानितेषांयशो ते शो
सिनचसीदतिधर्मःवर्गः धन्या
स्तएवनिभृतात्मजभृत्यदाराये
षांसदाभ्युदयदाभवतीप्रसन्ना॰ ५

चं॰ यर्म्माणिदेविसकलानिसंदेवक
६॰ र्म्मीणएनपाहृतःप्रतिदिनेसुकृती
60 करोति स्वर्गप्रयातिचनतोभवती
प्रसादालोकत्रयेपिफलदानवदे
विनेन ६९ ॐमस्त्ताहरसिभीति

मशेषजंतोःस्वस्थैःस्मृतामतिम
तीवशुभांददासि दारिद्र्यदुःखभ
यहारिणिकात्वदन्यासर्वोपकार
करणायसदार्द्रचित्ता ९ एभिर्ह
तैतिसमंविनश्यैतेऊर्वंततनामनरका

वे॰
६१

यविराय पापं संग्राममरत्सुमयिग
मदिवेप्रयांतमवेतिन्नमहिन्ना
विनिहेमिदेवि ९५ इहेवकिन्नम
वतीप्रकरोतिभस्मसर्वास्त्रानरि
पुयस्यहिणोखिशास्त्रं लोका

61

सर्वोत्तरिपवोपिहिंसात्वमूनाहमस्य
मतिर्भवतितेश्वपितेतिसाधी ९
त्वदङ्गप्रभानिकरविस्फुरणेलश्योये:
मूलाग्रकोतिनिवहेनदृशोःस्वग
ण यत्रागतानाविलयमेत्रमेदिडवे

वे॰ ९२
62

ॐयोगध्यानन्नेनवविलोकयन्तोतदे
नत् १ ॐह्रींतह्वतशामनेनवदेवी
शीलेन्तूपन्नेथेनदविचिंत्यमनवल
मेस्यैः वीर्येचहेत्वहन्नदेवपराक्र
माणावैरिस्वपिण्डकरितेनवदयानवेत्य १

केनोपमाभवतुतेस्यपराक्रमस्य
रूपंचशत्रुभयकार्य्यतिहारिकुत्र
चित्तेकृपासमरनिष्टुरतावदृष्टात
य्येवदेविवरदेविवरदेभुवनत्रये
पि २२ त्रैलोक्यमेतदखिलंरिपुना

दे॰
११

63

शनेनज्ञानेनत्वयासमरमूर्द्धतितेपि
हत्वा नीतादिवंरिपुगणाभयमप्य-
पास्तमस्माकमुन्मदसुरारिभवं
नमस्ते ११ शूलेनपाहिनोदेविपा
हिखड्गेनचांबिकेघंटास्वनेननः ॰

पोह्रिचापज्यानिःसनेनेव २४ प्रा
च्योरत्नप्रनीच्योवंचडिकेरत्नदत्ति
ले प्रामेणिनात्मसूलसउलरसां
नश्येश्वरि २५ सेम्यानियानिरूप
लिवैलोकेविवरंतिते यानिचामे

वं.
१४
64

पंचोरागिनिरत्नासोमात्मण्याभुवे २६
एविङ्गस्तूलगदादीनियानिवाह्नानि
नैविकेकरपल्लवसंगीनिनेरस्मा
नरत्नसर्वतः २७॥ ऋषिरुवाच॥२८॥ए
वंस्तुतासुरैर्दिव्यैःकुसुमैर्नन्दनोद्भवैः

श्रविनाजगतीधात्रीनद्यागंधानु
लेपनैः २९ भक्त्यासममलैस्त्रिदशे
हिश्चैर्धूपैर्लपूपिता प्राहृत्रमाद
समस्तौसममलान्यणतान्सरान् ३-
देव्युवाच॥३०॥ विपतोत्रिदशाः सर्वे

चं. यदस्मत्तोभिवांछितं ।११॥ देवाऊचु॥११
१५ भगवत्याकृतंसर्वंनकिंचिदवशि
ष्यते १४ यदयंनिहतःशत्रुरस्मा
65 कंमहिषासुरः यदिवापिवरोदे
यस्त्वयास्माकंमहेश्वरि १५ संस्मृ

ता संस्कृतानवज्ञो हिं सेव्याः परमा
पदः यश्च मर्मस्थलैर्वैरेभिर्भिन्नालो
छास्यमलानने १८ त्रस्याविनर्हि
विभैवैर्धनदारादिसंपदो हृड
येस्मात्रपत्नातंभवेष्याः सर्वेदावि

दे. ९९

66

को॥३७॥ऋषिरुवाच॥३८॥इतिप्रसादि
तादेवैर्जगतोर्थेन्तथात्मनः तथे
त्युक्त्वाभद्रकालीबभूवांतर्हितानृ
प ३९ इत्येतत्कथितंभूपसंभूतासा
यथापुरा देवीदेवशरीरेभ्योजगत्त्र

यहितैषिणी ४॰ पुनश्च गौरीदे
हात्सा समुद्भूता यथाभवत् । वधा
य दुष्टदैत्यानां तथा शुम्भनिशुम्भ
योः ५। रक्षणाय च लोकानां देवा
नामुपकारिणी तच्छृणुष्व मया

दे. ख्यानेयथावत्कथयामिते ॥४२॥ सां
६३ गायैत्रिवर्णात्मिकायैत्रिशक्तिलक्ष्म्यै
67 महाहुतिंसमर्पयामिनमःस्वाहा ॥ इति
श्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवी
वीमाहात्म्येशक्रादिस्तुतिर्नामचतुर्थोध्यायः ॥४॥

अथ ध्यानं॥ घंटाशूलहलानिशंख
मुसलेचक्रंधनुःसायकंहस्ताब्जै
र्दधतीघनांतविलसच्छीतांशुतु
ल्यप्रभां गौरीदेहसमुद्भवांत्रिज
गतामाधारभूतांमहापूर्वामत्रसर

वे॰ स्वतीमतुभनेस्मृभादिदेमादिनी ॥
१८ ऋषिरुवाच ॥ ९ ॥ घ्रराखेभनिष्ठभाभ्यो
मस्तराभ्योश्रुचपिनेः ञैलोक्यंयत्त
भागास्त्रहृनामदवलाध्ययात रता
वेवस्र्येतानउदयिकारेनप्येदवे
१६

कौवेरमप्ययाम्यंववकानेवकण
स्च १ तावेवपवनडिंववकन
वेक्रिकमेव ननोदेवाविनिर्ह्ना
भ्रहराज्याःपराजिताः ४ हृतापि
काराहिदशालाभ्यांसर्वेनिराकृताः

वे. ६९

69

महासराभ्यांतोदेवीसस्मरंमपरा
जितं ५ नयास्माकेवरोदतेयथ्या
वत्समस्तानिविलाःभवतानाशयि
ष्यामितत्क्षणात्परमापद ९ इतिकृ
त्वामतिंदेवाहिमवंतनगेश्वरं

जग्मुस्तत्रततोदेवींविष्णुमायांप्र
तुष्टुवुः ७ ॥देवाऊचुः॥८॥ नमोदे
व्यैमहादेव्यैशिवायैसततंनमः
नमःप्रकृत्यैभद्रायैनियताःप्र
णताःस्मतां ९ रौद्रायैनमोनित्या

वे. ये गोष्ठ्याये नमो नमः ओं त्वाये
२. वैत्रृपिप्लिये स्वाये स्वतंत्रे नमः १
70 कल्याणिये श्रमणताहृत्ये सिद्धे हृ मोन
मो नमः नेत्रस्मे भूस्तो लाहेसे सर्वा
णिने नमो नमः श्री तुर्णा षेर्णे पाराये

सारायैसर्वकारिण्यैख्यात्यैतथै
वकृष्णायैधूम्रायैसततंनमः ११
अतिसौम्यातिरौद्रायैनतास्तस्यैन
मोनमः नमोजगत्प्रतिष्ठायैदेव्यै
कृत्यैनमोनमः १२ यादेवीसर्वभूते

दे. षुविष्णुमायेतिशब्दिता नमस्तस्यै १४
११ नमस्तस्यै १५ नमस्तस्यै नमो नमः १६
यादेवीसर्वभूतेषुचेतनेत्यभिधी
यते नमस्तस्यै १७ नमस्तस्यै १८
नमस्तस्यैनमोनमः १९ ।

यादेवीसर्वभूतेषुबुद्धिरूपेणसं
स्थिता नमस्तस्यै २० नमस्तस्यै २१
नमस्तस्यैनमोनमः २२ यादेवीस
र्वभूतेषुनिद्रारूपेणसंस्थिता न
मस्तस्यै २३ नमस्तस्यै २४ नमस्त

चं. स्यैनमोनमः २५ यादेवीसर्वभूते
७२ षुलज्जारूपेणसंस्थिता नमस्तस्यै
२६ नमस्तस्यै २७ नमस्तस्यैनमो
नमः २८ यादेवीसर्वभूतेषुश्र
द्धारूपेणसंस्थिता नमस्तस्यै २९

नमस्तस्यै २९ नमस्तस्यै ३० नम
स्तस्यैनमोनमः ३१ यादेवीसर्वभू
तेषुशक्तिरूपेणसंस्थिता नमस्त
स्यै ३२ नमस्तस्यै ३३ नमस्तस्यैन
मोनमः ३४ यादेवीसर्वभूतेषुतृ

चं·
७१
मातृरूपेणसंस्थिता नमस्तस्यै १५
नमस्तस्यै १६ नमस्तस्यैनमोनमः
१७ यादेवीसर्वभूतेषुशान्तिरूपेण
संस्थिता नमस्तस्यै १८ नमस्त
स्यै १९ नमस्तस्यै ॥ ॥

नमोनमः ४० यादेवीसर्वभूतेषु
जातिरूपेणसंस्थिता नमस्तस्यै ४१
नमस्तस्यै ४२ नमस्तस्यैनमोनमः ४३
यादेवीसर्वभूतेषुलज्जारूपेणसं
स्थिता नमस्तस्यै ४४ नमस्तस्यै ४५

दे. नमस्तस्यैनमोनमः ४६ यादेवी-
२४ सर्वभूतेषुशान्तिरूपेणसंस्थिता
नमस्तस्यै ४७ नमस्तस्यै ४८ न
मस्तस्यैनमोनमः ४९ यादेवीस
र्वभूतेषुश्रद्धारूपेणसंस्थिता

नमस्तस्यै ५० नमस्तस्यै ५१ न
मस्तस्यैनमोनमः ५२ यादेवीस
र्वभूतेषुकांतिरूपेणसंस्थिता ।
नमस्तस्यै ५३ नमस्तस्यै ५४ नम
स्तस्यैनमोनमः ५५ यादेवीसर्व

दे. भूतेषुलक्ष्मी रूपेणसंस्थिता नम
७५ स्तस्यै ५६ नमस्तस्यै ५७ नमस्तस्यै
75 नमोनमः ५८ यादेवीसर्व्वभूतेषु
हृतिरूपेणसंस्थिता नमस्तस्यै ५९
नमस्तस्यै ६० नमस्तस्यैनमोनमः ६१

यादेवीसर्वभूतेषुस्मृतिरूपेणसं
स्थिता नमस्तस्यै ९२ नमस्तस्यै ९३
नमस्तस्यैनमोनमः ९४ यादेवीस
र्वभूतेषुदयारूपेणसंस्थिता नम
स्तस्यै ९५ नमस्तस्यै ९६ नमस्तस्यै

वं. नमोनमः ॥६७॥ यादेवीसर्वभूतेषु
७९ तुष्टिरूपेणसंस्थिता नमस्तस्यै ॥६८॥
76 नमस्तस्यै ॥६९॥ नमस्तस्यैनमोनमः
॥७०॥ यादेवीसर्वभूतेषुमातृरूपेण
संस्थिता नमस्तस्यै ॥७१॥

नमस्तस्यै १२ नमस्तस्यैनमोनमः १३
